उपशास्त्री - II खण्ड साहित्य तृतीय - पत्रम्
रघुवंश महाकाव्यम्
द्वितीयः सर्गः

Date ___/___/___

पुरन्दरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनन्द्यमानः ।
भुजे भुजङ्गेन्द्रसमानसारे भूयः स भूमेर्धुरमाससञ्ज ॥

उत्तरम् - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति ।
अस्मिन् श्लोके राजा दिलीपः इन्द्रसमान सम्पत्तिमान् अयोध्यानगर निवासिभिः अभिनन्दितः ।

व्याख्या - पुरन्दरश्रीः = इन्द्रवैभवः, महेन्द्रतुल्यः सः = राजा दिलीपः, पौरैः = नगरनिवासिभिः, अभिनन्द्यमानः = संस्तूयमानः, गीयमानकीर्तिः, उत्पताकं = उच्छ्रितध्वजम्, पुरं = नगरम् प्रविश्य = सम्प्रविश्य, भुजङ्गेन्द्रसमानसारे = शेषतुल्यबले, भुजे = स्वबाहौ, भूयः = पुनरपि, भूमेः = पृथिव्याः, धुरं = भारम्, आससञ्ज = समादधे ।

भावार्थ - इन्द्रसमानसम्पत्तिमान् राजा दिलीपः अयोध्यानगरनिवासिभिः 'जय राजन्' 'वर्द्धस्व महाराज' इत्यादि जयकारेण गीयमानकीर्तिः उच्छ्रितवैजयन्तिकाम योध्यां प्रविश्य शेषनाग समानबले निजभुजे पुनः राज्यभारं गृहीतवान् ।

Renu Devi
25/09/20
राधा उमाकान्त सं० महावि० सुखसेना
पूर्णिया ।

उपशास्त्री-I खण्ड साहित्य- तृतीयपत्रम्
रघुवंश महाकाव्यम्
द्वितीयः सर्गः

Saathi

Date ___ /___ /_____

सम्बन्धमाभाषणपूर्वमाहुर्वृत्तः स नौ सङ्गतयोर्वनान्ते ।
तद्भूतनाथानुग ! नार्हसि त्वं सम्बन्धिनो मे प्रणयं विहन्तुम्॥

उत्तरम् — प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति।
अस्मिन् श्लोके राजा दिलीपः शिवानुचरस्य प्रति सौहार्दमनुसरणीयोऽस्मीत्याह —

व्याख्या :— सम्बन्धं = सख्यम्, आभाषणपूर्वम् = आलाप-मात्रहेतुकम्, आहुः = विद्वांसो वदन्ति, सः = सम्बन्धः, वनान्ते = काननप्रान्ते, इह वने, सङ्गतयोः = मिलितयोः, नौ = आवयोः, वृत्तः = सञ्जात एव। तत् = तस्मात् कारणात्। हे भूतनाथानुग ! = हे शिवानुचर ! त्वं = भवान्, सम्बन्धिनः = सख्युः, मे = मम, प्रणयं = प्रार्थनां याच्चाम, विहन्तुं = विफली कर्तुं, नार्हसि = न योग्योऽसि।

Renu Devi
25/09/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया।

शास्त्री - II खण्ड साहित्य

रत्नावली - नाटिका

Date __/__/__

प्र०(1) पद्यमिदम् व्याख्येयम् ।

नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-
मन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ।
पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि श्री हर्षवर्धन प्रणीतस्य रत्नावली नाटिकायाः द्वितीयअंकात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके नेपथ्यमध्याद् अयं ध्वनिः श्रूयते यत्कोऽप्युद्दण्डः वानरः अश्वशालायाः अवमुक्तः जातोऽस्ति । तस्माद् वानराद् रक्षणाय जनाः भीताः सन्तः इतस्ततः धावन्ति । प्रस्तुते श्लोके कविना तस्य वानरस्य भयाद् धावन्तः क्लीबाः वामनाः किराताश्च वर्णिताः सन्ति ।

व्याख्याः - नपुंसकाः मनुष्येषु गणनाभावात् लज्जां विहाय धावन्ति भयवशात् अयं वामनः कंचुकिनः कञ्चुकम् अर्थात् कञ्चुकस्य अभ्यन्तरं प्रविशति । अन्तःपुरान्ताश्रयिणः किराताः स्वनाम्नः अनुरूपाचरणं कृतवन्तः, एवं स्वावलोकनभयात् कुब्जाः अवनताः सन्तः शनैर्गच्छन्ति ।

Renu Devi
25/09/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

Page No.

शास्त्री-I खण्ड    साहित्य

अभिज्ञानशाकुन्तलम्

Saathi

Date __/__/__

प्र(1) - पद्यमिदं व्याख्येयम् ।

यात्येकतोऽस्तशिखरं पतिरोषधीना-
माविष्कृतोऽरुणपुरः सर एकतोऽर्कः ।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां,
लोको नियम्यत इवात्मदशान्तरेषु ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोक महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्र चतुर्थोऽङ्कात् उद्धृतोऽस्ति।

व्याख्याः - एकतः एकस्मिन् स्थाने ओषधीनां पतिः चन्द्रमाः अस्ताचलं गच्छति अर्थात् अस्तं गच्छति तथा अन्यत्र सूर्यः स्वसारथिम् अरुणं पुरस्कृत्य उदयते । इत्थं तेजोद्वयस्य युगपद् अस्त-उदयाभ्यां संसारः स्वसुखदुःखात्मक विभिन्नदशासु नियन्त्रितः क्रियतेऽस्ति।

Renu Devi
25/09/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया